International Journal of Sanskrit Research 2021; 7(6): 255-258

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 255-258
© 2021 IJSR
www.anantaajournal.com
Received: 16-09-2021
Accepted: 21-10-2021

**अनिमेष-हालदार इत्यनेन**
अतिथि उपन्यासकः, मङ्गलुरु विश्वविद्यालय कालेज्, मङ्गलुरु, कर्नाटक, भारत

**Corresponding Author:**
**अनिमेष-हालदार इत्यनेन**
अतिथि उपन्यासकः, मङ्गलुरु विश्वविद्यालय कालेज्, मङ्गलुरु, कर्नाटक, भारत

# इदानीन्तनकाले लोकशिक्षणस्य प्रासङ्गिकता

**अनिमेष-हालदार इत्यनेन**

## प्रस्तावना

ग्रन्थारम्भे मङ्गलाचरणं हि भारतीयसंस्कृतेः विशेषवैशिष्ट्यम्। अतः महाकविना कालिदासेनापि स्वग्रन्थारम्भे मङ्गलाचरणं निपुणतया विहितम्। तत्र हि मङ्गलाचरणे इष्टदेवस्य तथा गुरोः स्तुतिमाध्यमेन श्रद्धा ज्ञाप्यते। तस्माच्च पाठकेषु दर्शकेषु वा मङ्गलाचरणस्य प्रभाववशात् प्रायशः श्रद्धाभावः परिलक्ष्यते।

अत्र नाटके पण्डितानां तृप्तिविधानं यावन्न भवति तावदभिनयकौशलं नोत्कृष्टं मन्यते सूत्रधारेण। प्रकृत्या ज्ञानी जनः स्वपारङ्गमताहेतोः स्वाहंकारं न प्रकाशयतीति पाठकैः अनुधावनीयम्। पाठकाश्च नैजे वास्तविकजीवने तदभिनयस्य आदर्शवस्तुनः प्रयोगे निरहंकाराः जायन्ते। ज्ञानिनो जनस्य एष एव महागुणः।

नटीसूत्रधारयोः मधुरसङ्गीतेन आकृष्टाः सन्तः सहृदयाः सामाजिकाः चित्रार्पितन्यायेन अवस्थिताः। अस्माच्च सामाजिकानां दर्शकानां मनःसंयोगस्य परिचितिर्लक्ष्यते। कस्यचिद् विषयस्य अनुधावनकाले तस्मिन् मनोयोगगाम्भीर्यादेव तस्मिन् विषये यथार्थज्ञानं जायते अन्यथा न। अतः वास्तवसमयेऽपि यथार्थज्ञानलाभार्थं मनःसंयोगः मनुष्याणाम् आवश्यकः।

राजा दुष्यन्तः कृष्णसारमृगं प्रति मनोज्ञदृष्टिनिक्षेपं कृत्वा तत्पश्चाद् धावति। अस्माज्ज्ञायते यत् लक्ष्यवस्तुनः प्रापणे यथार्थचेष्टा विधेया। किञ्च, मनुष्याणां न केवलं समग्रजीवने अपि तु प्रत्येकस्मिन् कर्मणि निर्दिष्टलक्ष्यं तिष्ठेदेव। अपि च, मृगवधाय राजा दुष्यन्तः मृगस्य पश्चाद्धावतीत्यतः मृगस्य वधः कार्यः इति न ग्राह्यं दर्शकैः। वन्यप्राणिनां वधो हि निषिद्धः। वनस्य वन्यप्राणिनां च संरक्षणाभावे प्राकृतिकपरिवेशस्य भारसाम्यं न तिष्ठति। किञ्च वृक्षच्छेदनमपि न कार्यम्। तस्माच्च वायुमण्डले अक्सिजेन इति वायुविशेषस्य ह्रासो भवति, कार्बनडाइ-अक्साइड् इति हानिकारकवायुविशेषस्य च वृद्धिर्भवति। तस्मात् तापाधिक्यं परिलक्ष्यते। अतः पृथिव्यां न केवलं मनुष्याणाम् अपि तु समेषामेव जीवानां जीवनाशंका जायते। अत एव वनस्य वन्यप्राणिनः संरक्षणमवश्यकर्तव्यम्।

यदा राजा हरिणमुद्दिश्य वाणनिक्षेपणोद्यतस्तदा वैखानसाह्वानमाकर्ण्य वाणस्य संवरणं चकार। अत्र राजा प्रबलावेगवान् अपि यथार्थवचनं पालितवान्। अतः दुष्यन्तचरितात् इदमेव अवगन्तव्यं यत् आवेगवशात् किमपि कार्यं न साध्यम्। केनापि वारिते तद्वचनं विचार्य श्रोतव्यमिति।

मृगवधाद्वरते दुष्यन्ते वैखानसः राज्ञः वंशप्रशंसां चकार। आदर्शस्य गुणवतः सज्जनस्य पितुः वंशस्य च सम्मानं यशो वा पुत्रेण अवश्यं रक्षणीयम्। वर्तमाने कालेऽपि कस्यचित् पुत्रस्य स्ववंशस्य स्वपितुश्च यशोरक्षणम् अवश्यकर्तव्यम्। तस्मादेव वंशस्य परम्परा सुष्ठु अवति।

ततश्च नाटके दृश्यते यत् महर्षिः कण्वः शकुन्तलायै अतिथिसत्काराय समग्रं भारं समर्प्य सोमतीर्थं ययौ। अस्माच्च ज्ञायते यत् अतिथिसत्कारो हि आवश्यकः। यस्मादेव कारणात् स्वस्य अनुपस्थितौ अपि यथा अतिथिसत्कारस्य कापि हानिर्न स्यादिति चिन्तया शकुन्तलायै तद्भारं निक्षिप्य सोमतीर्थं जगाम कण्वः। वर्तमानेऽपि काले गृहमागते अतिथौ यथार्थसत्कारो कार्यः। किन्तु, अहो दौर्भाग्यमस्माकं यत् इदानीं गृहमागते अतिथौ तस्मिन् सन्देहवशात् तस्य यथार्थसत्कारो न क्रियते। अविचार्य तन्न कार्यमिति राद्धान्तः।

राजा दुष्यन्तः सारथिश्च तपोवनस्य वृक्षाणां वन्यप्राणिनां बहु वर्णनं कृतवान्। तस्माच्च ज्ञायते मनुष्येतरप्राणिनः प्रति राज्ञः स्नेहः आसीदिति। वर्तमानेऽपि एतादृशं चित्रं प्रायशः परिलक्ष्यते। बहवो मनुष्याः मनुष्येतरप्राणिनः सयत्नं स्वगृहे परिपालयति। क्वचित् तेषु पुत्रस्नेहोऽपि परिदृश्यते। अतः प्रत्येकं जीवं प्रति यथोचिताचरणं कर्तव्यम्।

शकुन्तलां वर्णयता राज्ञा पद्मेन चन्द्रेण च शकुन्तलायाः तुलना विहिता। कमलं हि शैवालेन आवृतमपि चन्द्रश्च कलङ्काङ्कितोऽपि अधिकं सौन्दर्यं प्रकाशयतः। अत्र एवं वक्तुं शक्यते यत् ये तावद् गुणिजनः तेषां सामान्यदोषः न नयनगोचरो भवति। तेषां दोषमविगणय्य अस्माभिः साधारणैः जनैः आदर्शचरितम् अनुसरणीयमेव। तैश्च दर्शितमार्ग एवानुसरणीयः।

शकुन्तलासम्बन्धीयं समग्रं वृत्तजातं ज्ञात्वैव शकुन्तला ग्रहणीया इति चिन्तयति राजा। एवमेव कस्यापि कर्मणः सम्पादनात् प्राक् तद्विषये सम्यग् ज्ञात्वैव कर्म साधनीयमिति वार्ता राज्ञः एतादृगाचरणाद् उपलभ्यते। आवेगवशात् झटिति कोऽपि सिद्धान्तः न ग्रहणीयः। सम्यग् निरीक्ष्यैव सिद्धान्तः ग्रहणीय इति आशयः।

अनसूयासकाशात् राज्ञा ज्ञायते यत् गुणवतः सज्जनस्य पात्रस्य हस्ते एव शकुन्तलां समर्पयितुं महर्षेः कण्वस्य अभिप्रायः इति। आधुनिके कालेऽपि सत्पात्रे एव कन्यासमर्पणं पित्रा कर्तव्यम्। इदान्तीन्तने काले असत्पात्रे कन्यासमर्पणात् विविधाः विचित्राः घटनाः श्रूयन्ते। फलस्वरूपेण क्वचित् प्राणनाशाशंकापि दृश्यते। सखीद्वयेन सह शकुन्तला प्रस्थिता। तदा राज्ञापि तपोवनाद् निर्गतम्। तदा राजा स्वमानसिकदशां वर्णयति 'चीनांशुकमिव प्रतिवातं नीयमानस्ये'त्यादिना। तथैव अस्माकं प्रियजनविच्छेदसमये अपि एवमेव दशा भवति। गतेऽपि प्रियजने मनस्तु तत्रैव धावति।

द्वितीयाङ्कस्य आदावेव दृश्यते दुष्यन्तः शकुन्तलां चिन्तयति। शकुन्तलायाः आचरणं स्वानुकूल्येन विचारयति सः। एतस्मात् स्पष्टं प्रतीयतये राजा शकुन्तलायामनुरक्तः सञ्जात इति। एतादृशः कामी जनः दैनन्दिनजीवने सर्वं स्वाभिप्रायानुसारं चिन्तयति। अतः कामवशीभूतेन सर्वं वृत्तजातं स्वानुकूल्येन न चिन्तनीयमिति आशयः।

मृगयार्थं गते सति राजनि कायिकपरिश्रमात् तस्य शरीरं सुदृढं जातम्। इदानीमपि प्रत्येकं जनस्य कायिकपरिश्रमः आवश्यकः। तस्माच्च कर्मकरणसामर्थ्यं वृद्धिमेति। शरीरस्य मेदो न्यूनीभवति। तस्मात् शरीरसौन्दर्यमपि वर्धते। इदानीन्तने काले दृश्यते अनेके जनाः प्रातःकाले विविधव्यायामादिकं सम्पादयति।

विदूषकराज्ञोः वार्तालापाज्ज्ञायते समाजे प्रत्येकं जनस्य सविधे स्वात्मीयः सुन्दर इव प्रतीयते। कृतेऽपि अपराधे क्वचित् अतिप्रियत्वात् स न दोषीति प्रतीयते। यथा माता तस्य पुत्रस्य अनेकापराधमपि तुच्छं मन्यते प्रणयादेव।

शकुन्तलायाः नैसर्गिकं रूपं वर्णयता राज्ञा सर्वमेव विधातृसृष्टमिति मन्यते। तेनोक्तं विधाता आदौ शकुन्तलां चित्रे अर्पयित्वा ततश्च तस्यै प्राणान् ददाविति। अस्याः चिन्तायाः प्रतीयते विधाता समस्तवस्तूनामेव सृष्टिकर्ता इति।

प्रथमर्षिकुमारस्य मतानुसारेण वक्तुं शक्यते यत् - मुनीनां शान्ताश्रमः, गृहस्थस्य च संसाराश्रमः द्वयोः पार्थक्यं किमपि नास्ति। यथा तपस्विनः शान्त्यास्पदे आश्रमे स्थित्वा ध्यानादिना पुण्यादिकमर्जयन्ति तथैव साधारणाः संसारे स्थित्वा सत्कर्मभिः पुण्यादिकम् अर्जयन्ति। अतः संसारे स्थित्वा साधारणैः सत्कर्माणि एवाचरणीयानि। किञ्च, विपद्ग्रस्तानां रक्षणमपि अवश्यकर्तव्यम्।

याज्ञिकानां रक्षणाय राजा स्वजीवनमपि अविगणय्य यत्नवान् जातः। वर्तमानेऽपि काले प्रकृत्या ये ज्ञानिनः ते परार्थे स्वप्राणत्यागे सदैव उद्यताः भवन्ति। ते च महान्त इति मन्यते साधारणैः।

दुष्यन्तः शकुन्तलायाः अन्वेषणाय मालिनीनदीतटं गतः। अत्र राजा काम्यविषयं प्रति धावितः। कामिजनस्य यदि प्रथमकाम्यवस्तुलाभो भवति तर्हि कामना अधिकं वर्धते। इदानीमपि तथैव परिलक्ष्यते। एवं च तेषां लोभः अधिकं वर्धते विनाशं गच्छन्ति च ते। अतः कामिनो न भवेयुः।

शकुन्तलायाः सन्तापकारणं सखिद्वयं ज्ञातवद्यत् दुष्यन्तं प्राप्तुमिच्छया एव शकुन्तलायाः एतादृशी दशा सञ्जाता। तदा सखिद्वयेन तस्यै अभिनन्दनं निवेदितम्। अस्मात् प्रतीयते यत् यथायथम् इच्छा पूरणीया एव। स्वकीयां दशां विचार्यैव स्वाभिलाषो प्रकटनीयः।

शकुन्तलां प्रति आसक्तः सन् राजा दुष्यन्तः वामहस्तं ललाटे संस्थाप्य रात्रिम् अतिवाहितवान्। किन्तु निद्रा मनुष्यशरीरस्य अत्यन्तप्रयोजनीयोपकरणम्। विना निद्रां शरीरस्य पातो जायते। रोगग्रस्तो भवति स जनः। अत एव प्रत्येकं मनुष्याणां प्रत्यहं निद्रा अनुभवनीया।

राजा शकुन्तलां गान्धर्वविवाहेन परिणीतवान्। गान्धर्वविवाहः शास्त्रसम्मतः, गुरुजनैः अभिनन्दितः अनुमोदितश्च। एतच्च दुष्यन्तः शकुन्तलामवगमयितुं चेष्टते। इदानीन्तने काले गान्धर्वविवाहमतेन विवाहः अतिप्रचलितः, भूरिशः परिलक्षितश्च। गुरुभिः पितृभिः मातृभिश्च अनुमोदतः। किन्तु, विशेषतया मनसि चिन्तनीयं यत् यथार्थजनेन सह एव विवाहः भवेत् अन्यथा हानिः स्यादिति।

पतिगृहं प्रति गमनाय शकुन्तला नानालंकारैः भूषिता। तदा महर्षिः कण्वः स्वमनोव्यथां प्रकटीचकार यत् संसारिणः कन्यायाः विच्छेदे अधिकं कष्टमनुभवन्ति। प्रत्यहं जीवनेऽपि एवं दृश्यं भूयशो परिदृश्यते। निविडबन्धनच्छेदवशात्ते आत्मीयाः एवम् अनुभवन्ति।

कर्तव्यं शिष्यद्वयाय विनिवेद्य वन्यलताः वृक्षान् च प्रति शकुन्तलाचरणं स्मारितवान् महर्षिः कण्वः। या कदापि पल्लवं न चितवती, प्रथमपुष्पसमागमम् उत्सवममन्यत, सा शकुन्तला अद्य पतिगृहं याति। वन्यतरुराजिं प्रति शकुन्तलायाः यथा स्नेहः आसीत् तादृशः स्नेहः इदानीन्तने काले क्वचित् केषुचित् जनेषु दृश्यते। वृक्षान् प्रति यत्नो विधेयः । कुत्रचित् कारणवशाद्यदि वृक्षच्छेदः क्रियते तर्हि तस्मिन् स्थाने पुनः वृक्षरोपणम् अवश्यं विधेयम्। तस्माच्च परिवेशस्य साम्यं रक्षितं स्यात्।

शकुन्तलाविरहे तपोवनस्यापि विरहदशा सम्भूता। वृक्षाः मृगाः मयूराः चेति प्रत्येकं प्राणिनः शकुन्तलाविरहेण दुःखिता। किञ्चात्र उल्लेख्यं यत् कश्चित् मृगशावकः शकुन्तलायाः मार्गम् अवरुरोध। अतः शकुन्तलायाः मनुष्येतरप्राणिष्वपि स्नेहः प्रगाढ आसीदिति स्पष्टं प्रतीयते। आधुनिकेऽपि काले दृश्यते पोष्यप्राणिनः प्रति प्रभुः यत्नशीलो भवति। परिवारस्य प्रियजनविच्छेदे एतेषु प्राणिषु अपि विरहः प्रस्फुटितो भवति। मनुष्येतरप्राणिष्वपि मनुष्याः यत्नशीलाः भवेयुरित्यत्र आशयः।

राजानं दुष्यन्तं प्रति वार्ताप्रेषणप्रसङ्गे उच्यतेऽत्र यत् संयमो हि अस्माकं केवलं प्राणस्वरूपः। संयमेन हि सर्वे सुष्ठु मार्गं गच्छन्ति। जीवने मनुष्याः सुष्ठु कार्यसम्पादने असमर्थाः। संयमेनैव मनुष्याः सत्कर्मणि नियुक्ताः कर्मणां सुसम्पादकाश्च भवन्ति।

पतिगृहे किं कार्यं किञ्च अकार्यं तत्सर्वं पतिगृहगमनकाले शकुन्तलायै न्यवेदयत् महर्षिः कण्वः। महर्षेः उक्तितः कस्याश्चिद् उत्तमगृहिण्याः किं कर्तव्यं तत्सर्वं प्रस्फुटितम्। जीवने उत्तमरमणीभिः एवमेवाचरणं विधेयम्।

पतिगृहगमनकाले शकुन्तला पितरं कण्वमालिङ्ग्य क्रोडाद् विच्युता। परवर्तिनि काले कथं यापयेज्जीवनं तद्विषये महर्षिणा उक्तं यत् पतिगृहे आवश्यककर्मणि निरता सती विच्छेदवेदनां त्वं विस्मरिष्यसीति। मातापितृभ्याम् आत्मीयपरिजनेभ्यश्च प्रथमो विच्छेदो भवति अधिकः कष्टदायकः। इदानीमपि पतिगृहगमनसमये कन्यायाः समैव दशा परिलक्ष्यते। भविष्यति अपि समैव परिणतिर्दृश्यते।

सखीद्वयं शकुन्तलाम् अङ्गुरीयकप्रदर्शनवचनमुक्त्वा अवदत् - अतिस्नेहः सर्वदा अमङ्गलम् आशङ्कते। अधुनापि दृश्यते दूरदेशं गते सति कस्मिन् गृहस्थात्मीयाः तस्य अमङ्गमाशङ्क्य तस्मात् निवृत्त्युपायं वारं वारं स्मारयति तम्।

शकुन्तला पितरं कण्वं पृष्टवती यत् कदा सा पुनः तपोवनमागमिष्यतीति। प्रत्युत्तररूपेण महर्षिणा कण्वेन गार्हस्थ्यं यथायथं पालयित्वा ततश्च वानप्रस्थाश्रमे प्रवेशस्य सूचना प्रदत्ता। वर्तमानेऽपि दृश्यते ये ज्ञानिजनाः ते यथायथम् आश्रमधर्मं पालयन्ति। तेषाञ्च जीवनं सुन्दरतया अतिवाहितं भवति। अतः साधारणानामपि तथैव करणीयमिति वार्ता प्राप्यते।

पतिगृहं प्रति गमनार्थमुद्यतायां शकुन्तलायां महर्षिकण्वः सखीद्वयमुद्दिश्य उक्तवान् यत् कन्या प्रकृत्या परस्य सम्पद् इति। न्यस्तं द्रव्यं स्वामिनः हस्ते समर्प्य न्यासरक्षकः चरमशान्तिमाप्नोति। इदानीमपि कन्यां सत्पात्रे समर्प्य एव पितरौ शान्तिम् आप्नुतः। विच्छेदव्यथाम् अनुभवन्नपि पिता शान्तिमेव अनुभवति।

पञ्चमाङ्के दृश्यते हंसपदिकासंगीतेन राजा दुष्यन्तः विशेषतया तिरस्कृतः सन् उत्कण्ठितो जातः। हंसपदिकायाः सङ्गीतश्रवणानन्तरं राज्ञा मन्यते यत् मनोरमं किमपि दृश्यं दृष्ट्वा, मधुरसंगीतं श्रुत्वा सुखी जीवोऽपि उत्कण्ठितो भवति। वास्तवे जीवने अपि समैव दशा दृश्यते। पूर्वजन्मनः संस्कारः जीवस्य आत्मनि संलग्नस्तिष्ठति। संस्कारवशादेव बहूनां जनानां सद्बुद्ध्याः परिचयः प्राप्यते।

राज्यशासनं प्रति क्लेशाभिनयं कृत्वा राज्ञा उक्तं यत् ईप्सितस्य वस्तुनः प्राप्ति तृप्तिजनकः, किन्तु, तस्य रक्षणं क्लेशदायकमिति। जीवनेऽपि लक्ष्यते ईप्सितवस्तुनः लाभे आनन्दो जायते किन्तु, तस्य वस्तुनः पालनं रक्षणं वा कष्टदायकं भवति।

राज्ञा सह साक्षात्कारस्य किं कारणं कण्वशिष्यानामिति जिज्ञासया व्याकुलोऽभवत् राजा। स्वापराधः कश्चिज्जात इति मन्यमानो राजा अपराधनिर्धारणाय चेष्टते तदा। वर्तमाने कोऽपि गुणी जनः साधारणस्य सविधे वार्ताप्रेरणं करोति चेत् तदा साधारणो जनः बहु चिन्तयति। साधारणोऽपि यदि उन्नतमना भवति तर्हि स स्वापराधनिर्धारणे तत्परो भवति। एष एव सतां परिचयः।

शार्ङ्गरवस्य वचनाज्ज्ञायते यत् सृष्टेः आदिदेवो ब्रह्मा उपयुक्तवरेण उपयुक्तवध्वाः मेलनं सम्पादयति। वास्तवेऽपि समाजे दृश्यते येन केनचित् पात्रेण अपरस्य कस्यचित् वधूजनस्य मेलनं न संघटते। तदृष्ट्वा प्रतीयते ब्रह्मणा एव द्वयोर्मेलनम् अमङ्गलं मत्वा तन्निवारितमिति।

आश्रममाता गौतमी कण्वशिष्यद्वयञ्च शकुन्तलां नीत्वा पतिगृहे दुष्यन्तसविधे न्यस्तुं गताः। तदा शार्ङ्गरवेणोक्तं परिणीतायाः साध्विरमण्याः पतिगृहे स्थितिरावश्यकी। किञ्चोक्तं स्त्री स्वामिनः प्रियाऽप्रिया वा भवतु तस्यैव सविधे स्त्रियः तिष्ठेयुरिति। वर्तमानेऽपि कष्टं सोढ्वा स्त्रियः स्वामिनः गृहे तिष्ठन्ति।

यदा च शकुन्तला दुष्यन्तनिकटे स्वेच्छाचारिणीरूपेण अभिहिता तदा सा केवलं रोदिति स्म। तदा शार्ङ्गरवस्य वचनाज्ज्ञायते यत् विवाहात् प्राक् प्रेमिकाप्रमिकयोः निभृतं मेलनं न सङ्गतमिति। उभयोः विस्मरणहेतोः अस्वीकारहोतोर्वा कष्टम् अपमानं वा सहेते तौ। एतस्मात् क्वचित् प्राणनाशाशङ्कापि दृश्यते इदानीम्। अतः एवं न उभयोन आचरणीयम्।

षष्ठाङ्के रक्षिपुरुषद्वयेन चौर इति मत्वा कश्चित् पुरुषो राज्यश्यालकस्य सविधे आनीतः। स च स्वजीविकानिर्वाहस्य यथार्थघटनां ज्ञापितवान्। धीवरोऽपि अपमानं सोढ्वा यथार्थघटनां निवेदितवान्। यश्च यस्यां वृत्तौ जनिं लभते तत्रैव तस्याश्रयः। इदानीं दृश्यते निम्नवर्गान् प्रति हेयता। किन्तु समाजे शिक्षायाः उन्नतौ अपि मनुष्याणां मनांसि न परिवर्तितानि। एतादृशो भेदो न करणीयः।

अङ्गुरीयकदर्शनानन्तरं शकुन्तलाविषयकं सर्वं वृत्तान्तजातं राज्ञः स्मृतिपथमागतम्। तेनावगतं यत् मोहवशादेव शकुन्तला तेन परित्यक्ता आसीदिति। तेन सः अनुतापात् दग्धोऽभूत्। प्रमादे कृते गुणी जनः एवमेव अनुतापदग्धो भवति, परवर्तिनि काले च तथा प्रमादो यथा न स्यात् तदर्थं कृतसंकल्पो भवति। अधुनापि तथैव दृश्यते। किन्तु क्वचित् तद्विपरीतमपि परिलक्ष्यते। अत्यन्तचिन्ताग्रस्ते सति राजनि सर्वं वृत्तान्तजातं विदूषकाय न्यवदयत्। तदा नानाप्रकारेण विदूषकः तं बोधयितुं चेष्टते। यथा दुःखेषु सुखेषु वा कदापि कातरो न भवेत्। दुःखेषु सुखेषु च यः स्थिरस्तिष्ठति स एव ज्ञानी। प्रायः परिलक्ष्यते सर्वे एव मनुष्याः दुःखेषु कातराः भवन्ति। किन्तु तस्मिन् समये स्थिराः तिष्ठेयुः।

पुरुवंशस्य सन्तानाभावात् राज्ञः मरणानन्तरं समग्रधनादिकं परहस्तगतं भविष्यति, पूर्वपुरुषान् उद्दिश्य पिण्डप्रदानार्थं न कोऽपि स्थास्यतीति च चिन्तया भग्नमनोरथः सञ्जातः। उपयुक्तायाः धर्मपत्न्याः गर्भे यथाकालमेव निषिक्ते तेजसि उत्तमपुत्रस्य जन्म भवेत्। अतः समाजे धर्मपत्न्याः गुरुत्वमनस्वीकार्यमेव।

सप्तमे अङ्के देवराजः इन्द्रः राजनि सादरम् अभ्यर्थनायां निवेदितायाम् आत्मानम् अनुपयुक्तं मन्यते राजा दुष्यन्तः। अत्र देवराजः इन्द्रो यथा ज्ञानी राजा दुष्यन्तोऽपि तथैव ज्ञानी। स्वकर्मणः गर्वम् अहंकारं वा कदापि तौ न प्रकाशयतः। समाजे अपि क्वचित् क्वचित् तथैव ज्ञानी जनः परिदृश्यते यस्तावत् स्वकृतकर्मणः गर्वम् अहंकारं वा न प्रकाशयति। आदर्शज्ञानिजनानामेवमेव वैशिष्ट्यम्।

सर्वदमनहस्तात् सिंहशावकस्य मुक्तये तापस्या राजा आहूतः सर्वदमनाय च सदुपदेशं संयमादेशं च ददौ। दुष्यन्तवचनात् प्रतीयते यत् वंशमर्यादारक्षणं पितुः सद्गुणानुसरणं पुत्रस्य प्रथमं कर्तव्यम्। वर्तमानेऽपि काले कदाचित् एतादृशः पुत्र परिलक्ष्यते।

सर्वदमनो हि पुरुवंशोद्भूत इति तापसीमुखात् श्रुत्वा राजा तस्य आश्रमधर्मपालनाय चिन्तां चकार। प्रत्येकं मनुष्याणाम् आश्रमधर्मपालनं कार्यम्। इदानीं तु समेषामाश्रमधर्माणां पालनं न भवति। तथापि केचित् चेष्टन्ते।

सर्वदमनस्य मातरं शकुन्तलाम् अवलोक्य राजा विस्मितः सञ्जातः। प्रत्याख्यातायाः आदर्शरमण्याः दशा कीदृशी भवति सा राज्ञा लक्षिता। इदानीन्तने कालेऽपि प्रत्याख्याता रमणी दृश्यते। ताश्च सर्वदा चिन्ताग्रस्ताः दीर्घविरहव्रतपालिकाश्च भवन्तीति।

मालविकाग्निमित्रनाटकस्य आदावेव अष्टमूर्तिविशिष्टस्य ईश्वरस्य स्तुतिर्विहिता। कार्यारम्भे ईश्वरस्य वन्दनाविधानं श्रद्धातिशय्यसूचकं भवति। तच्च दर्शकाः पश्यन्ति, तेषामपि हृदये श्रद्धा जायते, श्रद्धाशीलाश्च ते भवन्ति।

कालिदासरचितस्य मालविकाग्निमित्रमिति नाटकस्य अनुष्ठानवर्णनाप्रसङ्गे सूत्रधारवचनाज्ज्ञायते ज्ञानिनो हि विचक्षणसामर्थ्येन सम्यग् विचार्यैव कार्यं कुर्वन्ति। वर्तमानेऽपि काले विचक्षणाः कमपि विषयं विचार्यैव गृह्णन्ति।

विदर्भराजं प्रति युद्धं चिकीर्षन् अग्निमित्रः अमात्येन सह वार्तालापसमये अमात्याभिमतं ज्ञातवान् यत् सद्यारोपितो वृक्षो यथा अनायासेन निर्मूलः कर्तुं शक्यते तथैव सद्य एव अभिषिक्तो राजा अनायासेनैव पराजेतुं शक्यते इति। वास्तवजीवनेऽपि सद्य आगतस्य जनस्य स्वप्रभावविस्ताराभावात् उच्छेदः परिलक्ष्यते।

देव्याः प्रत्युत्तरप्रसङ्गे गणदासस्य वचनाज्ज्ञायते यद् विद्वत्संसर्गेण मूर्खोऽपि विद्वान् भवति। पुण्यार्जितात् सतां सङ्गात् मूर्खजनाः धीरं धीरं ज्ञानिनः भवन्तीति इदानीमपि समाजे परिदृश्यते।

विदूषकमुखात् मालविकासम्बन्धि वचनं श्रुत्वा राज्ञा अग्निमित्रेण यद्भणितं तस्मात् ज्ञायते यत् यथा तृषार्तो जनः नदीति नाम श्रुत्वैव आश्वस्तो भवति तथैव कामी जनः काम्यवस्तुनः नामश्रवणादेव आश्वस्तो भवति। दैनन्दिने जीवने कामिनः काम्यवस्तुनः नामश्रवणात् कामाधिक्याच्च विनाशं प्राप्नुवन्ति।

अशोकतरोः स्वालंकारं संगृह्य तस्मिन् पदाघाते कृते मालविकया राज्ञा तीव्रप्रतिवादः कृतः। राज्ञः वचनादवगम्यते कमपि जीवं प्रति कदापि अवज्ञा न कार्या। वर्तमाने तु मालविकायाः आचरणं यथा तथा आचरणं भूरिशो दृश्यते। किन्तु तथा न कार्यमिति आशयः।

सर्पेण दष्टः विदूषकः इति वृत्तान्ते प्रचारिते सति तत्र आदौ किं किं कार्यं किञ्च अकार्यमिति सर्वं परिव्राजिकया उक्तम्। तत्र क्षतस्थाने छेदः, दाहः, रक्तमोचनं च कार्यम्। वर्तमाने क्वचित् क्वचित् स्थले एवमाचरणं दृश्यते। तस्य च आचरणस्य सुफलमपि परिलक्ष्यते।

मालविकायाः मुक्तये विदूषकोक्तं श्रुत्वा राज्ञा यदुक्तं तस्मात् प्रतीयते यत् सुहृदां कार्यकलापादेव लक्ष्यवस्तुनो लाभो भवति। अतः प्रत्येकं जनस्य कृते तस्य आत्मीयानां प्रियवस्तुलाभे सहायताप्रदानं कार्यम्।

परिव्राजिका स्वभ्रातुः सुमत्याः आत्मत्यागवर्णनं कृतवती। प्रभोः हिताय राज्ञः विपदः रक्षणाय स्वप्राणानपि प्रदाय त्यागव्रतः पालनीयः। वर्तमाने काले देशीयसैन्याः स्वदेशरक्षणाय स्वजीवविसर्जने न पाल्यन्ते। एते जनाः महान्तः आदर्शवन्तश्च। ते सदैव श्रद्धाभाजः स्नेहभाजश्च भवन्ति।

ग्रन्थारम्भे मङ्गलाचरणं हि प्राचीना रीतिः। तामेव रीतिमनुसृत्य महाकविकालिदासेन विक्रमोर्वशीयनाटकस्यादौ देवादिदेवस्य महादेवस्य स्तुतिरूपं मङ्गलाचरणं विहितम्। एवं मङ्गलाचरणात् सामाजिकानां हृदि श्रद्धाभावस्य जागरणं भवति। इदानीन्तनेऽपि काले कार्यारम्भात् प्राक् दूरदेशं प्रति गमनात् प्राग्वा देवमुद्दिश्य गुरुजनं वोद्दिश्य स्तुतिः क्रियते।

कालिदासरचितमिदं नाटकं यथा दर्शकाः निविष्टचेतसा पश्येयुस्तदर्थं तेषां सविधे प्रार्थनां निवेदयति सूत्रधारः। कस्यचिद्विषयस्य श्रवणसमये दर्शनसमये वा यथार्थं मनो विनिवेश्य श्रोतव्यं द्रष्टव्यं वेति सूत्रधारव्यवहारस्यास्य तात्पर्यमिति। दृश्यते च समनोयोगं कृतं कर्म सुफलदायकं भवति।

राज्ञा पुरूरवसा ऊर्वश्याः भीतिदशा चित्रलेखासविधे वर्णिता। तदा च ऊर्वशी भयात् चेतनाहीना सञ्जाता, तस्याः हृत्स्पन्दनं च अधिकं वर्धितम्। इदानीन्तनेऽपि काले दृश्यते भयग्रस्तो जनः कदापि अचेतनो जायते।

राज्ञा वर्णितात् दक्षिणवायोः ज्ञायते यत् दक्षिणवायुर्हि अतिमनोरमः चित्तहारी च। तेन वायुना चित्तमावेगपूर्णम् उत्सुकं च भवति। कामिनां तु दशा अधिकचञ्चला भवति। ऊर्वशीमुद्धृत्य चित्ररथः राजनि कृतज्ञताम् अर्पितवान् राज्ञश्च प्रशंसां चकार। तदा राज्ञा ज्ञातं यत् इन्द्रपराक्रमादेव कार्यमिदं सम्भवतीति। अस्माच्च राज्ञः महानुभावतायाः, निरहंकारस्य, आदर्शस्य च परिचयः प्राप्यते। वर्तमाने काले स्वल्पेषु एव मनुष्येषु एतादृशानां गुणानां प्रकाशो विद्यते।

राज्ञः गूढप्रणयवार्ता राजमात्रा ज्ञाता। स्वापराधं स्वीकृत्य च राजा क्षमां प्रार्थयामास राजमातरि। वर्तमाने काले गूढप्रणयस्तु भूरिशो दृश्यते। एवं कृतेऽपि अपराधे स्वापराधं स्वीकृत्य तत्कर्मणः विरतः सन् सत्कर्मणि रतो भवेदिति आशयः।

क्रुद्धायां सत्यां गतायां महामहिष्यां राजा ऊर्वशीविषयकविविधचिन्ताभिः मग्नः सञ्जातः। ये खलु कामिनो जनाः तेषां कामनाविषयमाधारीकृत्यैव चिन्ताधारा प्रचलति। अनेनैव सुखं लब्धुं चेष्टमानास्ते कामनाधिक्यात् विनष्टिमाप्नुवन्ति।

क्रोधवशादूर्वशी निषिद्धकुञ्जं प्रविश्य लतारूपं धृतवती। बोद्धुमशक्तः सन् पुरूरवा इतस्ततो भ्रमन् तस्याः अन्वेषणं करोति। प्रियजनविरहात् भ्रष्टमतिः सञ्जातः। केचित्तु प्रियजनविच्छेदात् चेतनाशून्याः भवन्ति, प्रलापं वा कुर्वन्ति। अतः प्रियजनविच्छेदेऽपि धैर्यं न त्यजेत्।

कञ्चुकी राज्ञः सविधे वार्तां न्यवेदयद् यत् सङ्गमनीयमणेः हरणकर्ता स्वापराधाय उपयुक्तं दण्डं लब्धवानिति। वर्तमानेऽपि दृश्यते अपराधिनां दण्डः ध्रुव एव, कदापि मनुष्याः तं प्रयच्छन्ति कदापि वा अन्ये। अतः अपराधकर्मणि न प्रवृत्तो भवेत्।

पुत्रस्य आयुषः वचनाज्ज्ञायते यत् ये तावत् बाल्यादेव पित्रोः सविधे तिष्ठन्ति तेषां श्रद्धाधिक्यं, भक्त्याधिक्यं, स्नेहाधिक्यं च परिलक्ष्यते। पित्रोः सविधे पुत्रं समर्प्य गतायां तापस्यां पुत्र आयुः अपि तया सह गन्तुमिच्छति। तदा च राजा तस्मै आश्रमधर्मपालनाय आदिदेश। प्रत्येकं जन एव आश्रमधर्मस्य पालनं कुर्यात्। आश्रमधर्मपालनाच्च नियमपरायणो भवेज्जन इति सारः।

**सहायकग्रन्थनिचयः**


1. अभिज्ञानशकुन्तलम् कालिदासप्रणीतम्, सम्पा. अनिलचन्द्रवसुः, संस्कृत-वुक्-डिपो, कलकाता, २००९.
2. अभिज्ञानशकुन्तलम् कालिदासप्रणीतम्, सम्पा. सत्यनारायणचक्रवर्ती, संस्कृत-पुस्तक-भाण्डार, कलकाता, २००८.
3. अर्थशास्त्रम् कौटिल्यविरचितम्, (द्वितीयखण्डः) सम्पा. मानवेन्दु-वन्द्योपाध्यायः, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०११.
4. अर्थशास्त्रम् कौटिल्यविरचितम्, (प्रथमप्रकरणम्) सम्पा. अनिलचन्द्रवसुः, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०१२.
5. कुमारसम्भवम्, कालिदासविरचितम्, (पञ्चमसर्गः) सम्पा. अशोककुमारवन्द्योपाध्यायः, वलरामप्रकाशनी, कलकाता, १४१८(बङ्गाब्दः).
6. नाट्यशास्त्रम् भरतप्रणीतम्, सम्पा. सुरेशचन्द्रवन्द्योपाध्यायः, नवपत्रप्रकाशनम्, कलकाता, २०१४.
7. मनुसंहिता मनुप्रणीता, (सप्तमोऽध्यायः) सम्पा. अन्नदाशङ्कर-पाहाडी, संस्कृत-वुक्-डिपो, कलकाता, २०१६.
8. स्वप्नवासवदत्तम् भासविरचितम्, सम्पा. अनिलचन्द्र-वसुः, संस्कृत-वुक्-डिपो, कलकाता, २००९.
9. विक्रमोर्वशीयम् कालिदासप्रणीतम्, सम्पा. सीतानाथाचार्यः, संस्कृत-पुस्तक-भाण्डार, कलकाता, १९९९.
10. चक्रवर्ती, शिवपद, नीतितत्त्व, पश्चिमबङ्गराज्यपुस्तकपर्षद्, कलकाता, १९९६.
11. शास्त्री, गौरीनाथ, संस्कृत साहित्य सम्भार् (प्रथमखण्ड), नवपत्रप्रकाशन, कलकाता, २०११.
12. शास्त्री, गौरीनाथ, संस्कृत साहित्य सम्भार् (नवमखण्ड), नवपत्रप्रकाशन, कलकाता, २०११.
13. शास्त्री, गौरीनाथ, संस्कृत साहित्य सम्भार् (दशमखण्ड), नवपत्रप्रकाशन, कलकाता, २०११.
14. अधिकारी, तारकनाथ, वैदिक संकलन, (प्रथमखण्ड) संस्कृत वुक् डिपो, कलकाता, २०१२.
15. दास, देवकुमार, संस्कृतसाहित्येर् इतिहास्, वलराम प्रकाशनी, कलकाता, १४१९ (बङ्गाब्द).
16. चक्रवर्ती, सत्यनारायण, पाणिनीय शब्दशास्त्र, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०१२.
17. अञ्जय, तपनकुमार, संक्षिप्त विद्यार्थी वांला संस्कृत शब्द ओ धातु अभिधान, मेडिटेक् इण्डिया, कलकाता, २०१६.
18. Mukhopadhyaya, Govindagopala. A New Tri-Lingual Dictionary: Sanskrit-Bengali-English. Sanskrit Book Depot, 28/1 Bidhan sarani, Kolkata-700006, 2013.
19. Kale MR. The Vikramorvasiyam of Kalidasa. Motilal Banarasidass Publishers Private Limited, Delhi, 1967.
20. A History of Sanskrit Literature: A.A. Macdonell. London, 1900.